*Pratidhwani the Echo*
*A Peer-Reviewed International Journal of Humanities & Social Science*
***ISSN: 2278-5264 (Online) 2321-9319 (Print)***
***Impact Factor: 6.28** (Index Copernicus International)*
*Volume-XI, Special Issue, June 2023, Page No.342-344*
*Published by Dept. of Bengali, Karimganj College, Karimganj, Assam, India*
*Website: http://www.thecho.in*

# श्रीमद्भगवद्गीताप्रतिपादितस्य सांख्यतत्त्वविमर्षः

**चैतालि च्याटार्जी**
*संस्कृत विभाग, पाँचमुड़ा महाविद्यालय, बाँकुड़ा, पश्चिम बंगाल, भारत*

**Email:** chaitalichatterjee48@gmail.com

**सांख्यदर्शनम्**: सांख्यदर्शनप्रवर्तकःकपिलमुनिः। तच्छिष्य आसुरीः, आसुरिशिष्यः पञ्चशिखाचार्यः। अयं हि आचार्यः सांख्यदर्शनम् उपजीव्य सांख्यसिद्धान्ताः बहुधा विहताः। दौर्भाग्यात् ग्रन्थास्ते नुपलभ्यन्ते। पातञ्जलदर्शनभाष्ये तद्वचनानि कानिचन उद्धृतानि दृश्यन्ते। अतः तत्वसमास इत्येव प्राचीनतमग्रन्थः सांख्यानाम् इति वादः सुप्रथितः । प्राच्यपाश्चात्यपण्डितानां मतानि विमृष्य सांख्यपरम्परा इत्थम् निर्णेयेतुम् शक्यन्ते

सांख्यदर्शनं हि दर्शनान्तरमिव दुःखवादम् विवृणन् प्रारब्धम्। दुःखत्रयतापपराहता दुःखत्रयनिवृत्ति अनुसन्धाना सांख्यदार्शनिकैः इत्थम् उपदिष्टाः।


**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे सा पार्था चेन्नैकान्तात्यन्ततोहभावात्।।**

सांख्यानां नये ऐकान्तिकात्यन्तिकदुःखनिवृत्या हि मुक्तिलाभः। ननु कथम् एतादृशि दुःखनिवृत्तिः इति चेत् इति शिष्यजिज्ञासा श्रमणाय सांख्यशास्त्रारम्भः। अत्र सांख्यदर्शनप्रतिपादेषु तत्वेसु प्रसिद्धानि कानिचन सांख्यदर्शनानुसारं निरुप्य गीतोक्तः सांख्यतत्त्वैः तेषां समासेन विमर्षनं विधियते।
सांख्यमते ऐकान्तिकात्यन्तिकदुःखनिवृत्तिरूपा याः मुक्तेः प्रकृष्टोपायो हि ज्ञानम् । तथा च सांख्यसूत्रम् ज्ञानात् मुक्तिः इति । ननु किम्विषयकाच्चज्ञानात् इति चेत् उच्यते – प्रकृतिपुरुषविवेकज्ञानात् मुक्तिः। सांख्यसमानतन्त्रम् पातञ्जलमपि एतद्धि अनुमियति । तथाच पातञ्जलसूत्रम् – विवेकख्यातिः अविप्लवा हानुपायः । प्रकृतिपुरुषभेदधीरेव दुखनिवृत्तिः उपायः।

**विमर्षनम्:** सांख्यदर्शनप्रतिपादितं दुःखनिवृरुपायतत्त्वम् भगवता श्रीकृष्णेन साक्षात् अनुमोदितम् –
क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारतः।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम।। 13.2
क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयोः यद्भेदज्ञानं तदेव श्रेष्ठज्ञानम् इति नेमतिः – इति भगवद्वाक्यार्थः । तथाच गूढार्थदीपिकायां मधुसूदनेन इत्थं प्रत्यपादि । पुनश्च भगवतैव अमुम् अध्यायम् उपसंहरता सुस्पष्टं प्रकृतिपुरुषयोः विवेकख्यात्या परमपदप्राप्तिर्निरुक्ता –
क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षञ्च ये विदुर्यान्ति ते परम्।। 13.3

गूढार्थदीपिकाकृता श्लोकसिद्धान्तम् उपस्थापयता उक्तम् – तदेवम् अमानित्वादि साधननिष्ठस्य क्षेत्रक्षेत्रज्ञविवेक विज्ञानवतः सर्वासर्वानर्थनिवृत्वा परमपुरुषार्थसिद्धिः इति सिद्धम्।

**सांख्योक्ततत्त्वविमर्षनम्:** सांख्यैः हि शास्त्रे चतस्रः विधाः सम्भाष्यन्ते। तत्र कश्चिदर्थः प्रकृतिः, कश्चिद् प्रकृतिविकृतिः, कश्चिद् विकृतिः, कश्चिच्च अनुभयरूपः । प्रकृतिः हि मूलाप्रकृतिः इत्यभिधियते। महदादेः कार्यकलापस्य अस्य असौमूलं न तु अस्य प्रधानस्य मूलान्तरमस्ति। मूलप्रकृतिभूतात् प्रधानसंज्ञकात् प्रथमतत्त्वात् बुद्धिरूत्पद्यते । अस्या बुद्धेरेव महदिति संज्ञा । बुद्धिसामान्यभुतात् महतः अहंकारोत्पत्तिः । अहंकारश्चासौ त्रिविधः – सात्विक-राजस-तामसभेदात् । सात्विको वैकारिक इति, राजसस्तैजस इति , तामसौभूतादेरित्युच्यते । सात्विकात् च अहंकारात् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि मनश्चेति एकादशेन्द्रियाणाम् समुत्पत्तिः। तैजसात् च अहंकारात् शब्दः, स्पर्शः, रूपं, रसः, गन्धः च इत्येषां पञ्चतन्मात्रानाम् उत्पत्तिः। पञ्चतन्मात्राच्च यथाक्रमं पृथिवी-अप्-तेज-वायु-आकाशानां पञ्चभूतां प्रादुर्भावः। इत्थम् प्रकृतितः पञ्चतन्मात्राणि इति चतुर्विंशति हि तत्वानि सांख्यदर्शने सिद्धान्तितानि।




**सांख्योक्ततत्वानां गीतादिशा विमर्षनम्-**
भगवता गीतायां चतुर्विंशतितत्वानाम् एवं संग्रहं कृतम्-

> **महाभूतान्यहंकारो वुद्धिरव्यक्तमेव च।**
> **इन्द्रियाणि दशैकञ्च पञ्चचेन्द्रियगोचराः।।** गीता. 13.5

शंकरनये महाभूतानि शब्द-स्पर्श-रूप-रस-गन्धात्मकानि पञ्चतन्मात्राणि। अहंकारः वुद्धिः महत् अव्यक्तं प्रकृतिः दशेन्द्रियाणि श्रोत्रादिणि पञ्चबुद्धिन्द्रियाणि, तथा वाक् पाण्वादिणि पञ्चकर्मेन्द्रियाणि, एकम् इन्द्रियं-मनः इति एकादशेन्द्रियाणि पञ्च च इन्द्रियगोचराः पञ्चमहाभूतानि इति शाकल्येण चतुर्विंशतितत्त्वानि। तथा हि शङ्करभाष्यम्-

'महाभूतानि महान्ति च तानि सर्वविकारव्यापकत्वाद् भूतानि च सूक्षानि महान्ति च तानि सर्वविकारव्यापकत्वाद् भूतानि च सूक्षाणि। स्थुलानि तु इन्द्रियगोचर शव्देन अभिधायिष्यन्ते। अहंकारो महाभूतकारणम् अहंप्रत्ययलक्षणः। अहंकार-कारणं वुद्धिः अध्यावसायलक्षणा। तत्कारणम् अव्यक्तम् एव च न व्यक्तम् अव्यक्तम् अव्याकृतम् ईश्वरशक्तिः 'मम माया दुरत्यया' (गीता 7.14) इति उक्तम्। एव शब्दः प्रकृत्यवधारणार्थः एतावती एव अष्टधा भिन्ना प्रकृतिः। च शब्दो भेदसमुच्चयार्थः। इन्द्रियाणि दश श्रोत्रादीनि पञ्चवुद्ध्यत्पादकत्वाद् वुद्धीन्द्रियाणि, वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात् कर्मेन्द्रियाणि तानि दश। एकं च, किं तद् ? मन एकादशं संकल्पाद्यात्मकम्। पञ्च च ईन्द्रियगोचराः शब्ददयो विषयाः। तानि एतानि सांख्याः चतुर्विंशतितत्वानि आचक्षते'।

सममेवार्थं प्रतिपादयद्भिरपि मधुसूदनसरस्वतिपादैः अन्यथा अर्थे निरुप्यते: एवं प्ररोचितायार्ज्जुनाय क्षेत्रस्वरुपं तावदाह द्वाभ्याम्- महान्ति भूतानि भूम्यादिनि पञ्च, अहंकारस्तत्कारणभूतोऽभिमानलक्षणः, बुद्धिरहंकारकारणं महत्तत्त्वमध्यवसायलक्षणं, अव्यक्तं तत्कारणं सत्त्वरजस्तमोगुणात्मकं प्रधानं सर्व्वकारणं न कस्यापि कार्यम्। एवकारः प्रकृत्यवधारणार्थः। एतावत्येवाष्टधा प्रकृतिः। चशब्दो भेदसमुच्चयार्थः। तदेवं सांख्यमतेन व्याख्यातम्।

टीकाद्वयं पर्यालोचनेन इत्थमापतितं महाभूतार्थः तन्मात्राणि इति शांकरमतम्, सरस्वतिमतं तु महाभूतानि नाम प्रसिद्धानि भूभ्यादिनि पञ्चनहाभूतादिनि।

**सहायकग्रन्थाः**

1) ब्रह्मर्षि, बावरा विश्वात्मा, गीता कर्म विज्ञान, दिव्यलोक प्रकाशन, विराटनगर, पिजिर,1993

2) सातवलेकर, श्री पाद दामोदर, श्रीमद्भगवद्गीता, पुरुषार्थबोधिनीटीका, स्वाध्याय मण्ढल, बलसाड,1983

3) दीक्षित, भागीरथ, भगवतगीता एक नया अध्ययन, भारतीय ज्ञानपीठ प्रकाशन, नया दिल्ली,1987